त्मिकां गदाम् वहन् गदाधरः” भा० । विष्णोर्मूर्त्तिभेदे गदाया हस्तविशेषेण धारणं ध्यानशब्दे विष्णुचतुर्विंशतिमूर्त्तिध्यानकथने वक्ष्यते ।

**गदाभृत्** पु० गदां बिभर्त्ति भृ—क्विप् तुक् । विष्णौ हेमच० “पार्श्वस्थास्य गदाभृतः” भाग० १० रासपञ्चाध्याये ।

**गदामुद्रा** स्त्री “अन्योन्याभिमुखौ हस्तौ कृत्वा तु ग्रथिताङ्गुली । अङ्गुष्ठौ मध्यमे भूयः सुलग्ने सुप्रसारिते । गदामुद्रेयमुदिता विष्णुसन्तोषवर्द्धिनी” तन्त्रसारोक्ते विष्णुपूजाङ्गे मुद्राभेदे ।

**गदाम्बर** पु० गदोऽभ्रध्वनियुक्तमम्बरमस्मात् । १मेघे त्रिका० ।

**गदाराति** पु० ६त० । १औषधे राजनि० ।

**गदालोल** न० गयातीर्थस्थे हेतिदैत्यनाशोत्तरं गदाक्षालनाज्जाते तीर्थभेदे “क्षालनार्थं गदा यत्र विष्णुना लोलिताऽभवत् । बभूव तद्गदालोलं तीर्थं परमपावनम्” वायुपु० गया० ५ अ० ।

**गदावसान** न० गदाया जरासन्धत्यक्तगदागतेरवसानमत्र । मथुरासमीपस्थे जरासन्धत्यक्तगदापतनस्थाने । “निहते वासुदेवेन तदा कंसे महीपतौ । जातो वै वैरनिर्बन्धः कृष्णेन सह तस्य ( जरासन्धस्य कंसश्वशुरस्य) वै । भ्रामयित्वा शतगुणमेकोनं तेन भारत ! । गदा क्षिप्ता बलवता मागधेन गिरिव्रजात् । तिष्ठतो मथुरायां वै कृष्णस्याद्भुतकर्म्मणः । एकोनयोजनशते सा पपात गदा शुभा । दृष्ट्वा पौरैस्तदा सम्यग्गदा चैव निवेदिता । गदावसानं तत् ख्यातं मथुरायाः समीपतः । तस्यास्तौ हंसडिम्भकावशस्त्रनिधनावुभौ” भा० सभा० १८अ० ।

**गदासन** न० “गदासनमथो वक्ष्ये गदाकृति वसेत् भुवि । ऊर्द्ध्वबाहुर्भवेत् येन तस्य साधनहेतुना” तन्त्रसारोक्ते आसनभेदे ।

**गदित** त्रि० गद—क्त । कथिते स्त्रियां टाप् “ननभर सहिता गदितोज्ज्वला वृ०र० । अत्र गदितोज्ज्वलेति छन्दो नाम इत्यन्ये । उज्ज्वलेत्येव नामेति बहवः ।

**गदिन्** पु० गदाऽस्त्यस्य इनि । १विष्णौ “किरीटिनं गदिनं चक्रिणञ्च” गीता । २गदाधारिमात्रे त्रि० । “पिनाकिनं वज्रिणं दीप्तशूलम् परश्वधिनं गदिनं त्वायतासिम्” भा० द्रो० २०१ अ० । गद+इनि । ३रोगयुक्ते त्रि० स्त्रियां ङीप् ।

**गद्गद** वाक्स्खलने कण्ड्वा० पर०अक०सेट् । गद्गद्यति अगद्गद्यीत् अगद्गदीत् गद्गद्या(दाम्)बभूव आस चकार ।

**गद्गद** पु० गद्गद—कण्ड्वा० भावे घञ् कर्त्तरि अच् वा यलोपः १अव्यक्तास्फुटशब्दे । २तद्वति त्रि० अमरः । तन्निदानमाह “आवृत्य वायुः सकफो धमनीः शब्दवाहिनीः । नरान् करोत्यक्रियकान् मूकमिन्मिनगद्गदान्” माधवकरः । सा०द० तु सात्त्विकभावोक्तौ स्वरभङ्गरूपता तस्योक्ता यथा “स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः” इत्याद्यष्टसात्त्विकभावानुक्त्वा “मदसंमोदपीड़ाद्यैर्वैस्वर्य्यं गद्गदं विदुः” इत्युक्तम् “तत् किं रोदिषि गद्गदेन वचसा कस्याग्रतो रुद्यते नन्वेतन्मम, का तवास्मि दयिता, नास्मीत्यतो रुद्यते” अमरुश० । “विललाप सवाष्पगद्गदम्” रघुः । “हर्षस्त्विष्टावाप्तेर्मनःप्रसादोऽश्रुगद्गदादिकरः” सा०द० । “सगद्गदस्वरं किञ्चित् प्रियं प्रायेण भाषते सा०द० मुग्धानुरागोक्तौ । तत्र कुशलः आकर्षा० कन् । गद्गदक गद्गदकुशले त्रि० । सुश्रुते गद्गदत्वकारणमुक्तम् “तमतिस्थूलं क्षुद्रश्वासपिपासाक्षुत्स्वप्नस्वेदगात्रदौर्गन्ध्यक्रथनगात्रसादगद्गदत्वानि क्षिप्रमेवाविशन्ति” ।

**गद्गदध्वनि** पु० गद्गदः कफादिनाऽव्यक्तः ध्वनिः । हर्षशोकादिना सकफेन वायुना यथास्थानानुच्चारणात् संजाते अव्यक्तध्वनौ । बकु०स० । २तद्वति त्रि० ।

**गद्य** त्रि० गद—यत् । १कथनीये “सह्यः कथं वियोगस्य गद्यमेतत्त्वया मम” भट्टिः । सा० द० उक्ते २पादरहिते काव्यभेदे न० । “श्रव्यं श्रोतव्यमात्रं तत् पद्यगद्यमयं द्विधा” इति श्रव्यकाव्यं विभज्य “वृत्तबन्धोज्झितं गद्यं मुक्तकं वृत्तगन्धि च । भवेदुत्कलिकाप्रायं चूर्णकञ्च चतुर्व्विधम् । आद्यं समासरहितं वृत्तभागयुतं परम् । अन्यद्दीर्घसमासाढ्यं तुर्य्यं चाल्पसमासकम् । मुक्तकं यथा “गुरुर्वचसि पृथुरुरसीत्यादि । वृत्तगन्धि यथा समरकण्डूयननिविडभुजदण्डकुण्डलीकृतकोदण्डशिञ्जिनीटङ्कारोज्जागरितवैरिनगरः । अत्र कुण्डलीकृतकोदण्डेत्यनुष्टुब्वृत्तस्य पादः । उत्कलिकाप्रायं यथा अणिसविस्सुमरणिसिद्दरसरविसरविदलिदसमरपरिगदपवरपरबलेत्यादि (प्राकृतम्) । चूर्णकं यथा गुणरत्नसागर ! जगदेकनागर ! कामिनीमदन ! जनरञ्जनेत्यादि” । छन्दोमञ्जर्य्यामन्यथाभेदसंहितं तल्लक्षणादिकमुक्तं यथा “गद्यं पद्यमिति प्राहुर्वाङ्मयं द्विविधं बुधाः । प्रागुक्तलक्षणं पद्यं गद्यं सम्प्रति गद्यते । अपादं पदसन्तानं गद्यं तत्तु त्रिधा मतम् । वृत्तकोत्कलिका